## 1.1.4Q[l]Mसर्वाणिसंस्कृतसम्बद्धानि शास्त्रसम्बद्धानि च पाठ्यविवरणानि संस्कृतमाध्यमेन उपलभ्यन्ते।

संस्कृतेनिर्मितानां स्नातक-स्नातकोत्तरपाठ्यविवरणानां विवरणं देयम्। पाठ्यक्रमाणां सम्पूर्णा सङ्ख्या, पाठ्यक्रमानुसारेण, संस्कृतरूपान्तरेण समुपलभ्यमानाःपाठ्यक्रमाः।

### -शास्त्रपाठ्यक्रमः-

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य द्वाविंशतिविभागेषु शास्त्रसम्बद्धविषयाः संस्कृतभाषामाध्यमेन पाठ्यन्ते। तेषां परीक्षाऽपिसंस्कृतभाषया सञ्जायते। अत्रशास्त्रिकक्षायां डिप्लोमाकक्षायां स्नातक/परास्नातकप्रभृतिषुशास्त्रसम्बद्धपाठ्यक्रमाः संस्कृतभाषायां निर्मितास्सन्ति। तत्र संकायक्रमे केचन प्रमुखााः पाठ्यक्रमाः इमे सन्ति -

### सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

| क्र०सं० | वेदवेदाङ्गसंकायः | साहित्यसंस्कृतिसंकायः | श्रमणविद्यासंकायः | दर्शनसंकायः | आधुनिका भाषा एवं भाषाविज्ञानम् |
|---|---|---|---|---|---|
| | वेदः<br>ज्यौतिषम्<br>व्याकरणम्<br>धर्मशास्त्रम् | 1. साहित्यः<br>2. पुराणम्<br>3. राजशास्त्रम्<br>4. संगीतकलादिकम् | 1. पालिः एवं थेरवादः<br>2. बौद्धदर्शनम्<br>3. जैनदर्शनम्<br>4. संस्कृतविद्या<br>5. प्राकृतम् | 1. वेदांतः<br>2. न्यायः<br>3. तुलनात्मक-धर्मदर्शनम्<br>4. मीमांसा<br>5. सांख्ययोग-तन्त्रागमः | 1. आधुनिकविद्याः<br>2. शिक्षाशास्त्री |

एवं आहत्य द्विसप्ततिपाठ्यक्रमेषु षष्टिपाठ्यक्रमाः शास्त्रसम्बद्धाः वर्तन्ते। इमे खलुपाठ्यक्रमाः शास्त्रि-आचार्यकक्षासु छात्रैः स्वेच्छया पाठनामस्वीक्रियन्ते। अत्र खलुविषयान्छात्राः अनिवार्यरूपेणपठन्ति, गौणेषुविषयेषुछात्राः स्वरूच्यावैकल्पिकपद्धत्यानिषयचयनेकुर्वन्ति। एतेषां सर्वेषां पाठ्यक्रमाणां प्रश्नपत्राणि च संस्कृतभाषायामेव निर्मीयन्ते।

शास्त्रिकक्षायां शास्त्रसम्बधतेराणि हिन्दी-आँग्लप्रभृतीनि भाषापत्राणि तासु-तासुनिर्धारितासु भाषासुनिर्णीयन्ते। तेषां पाठ्यक्रमपठन-पाठनक्रमश्चच तयाानिर्धारितया भाषया छात्राध्यापकेन क्रियते।

शास्त्रस्य अवयवभूतत्वेन पालिप्राकृतथेरवादविषयाः अङ्गीक्रियन्ते। तन्त्रतत्रसंस्कृत भाषायाः सम्बद्धत्वात्विशेषप्रभावाच्य तेषां पठनपाठनप्रश्नपत्रनिर्माणं च संस्कृत/पालि/प्राकृतभाषामाध्यमेन सम्पाद्यते।

आधुनिकभाषा एवं भाषाविज्ञानसंकायान्तर्गते शिक्षाशास्त्रिपाठ्यकमेसंस्कृतसम्बद्धाः ग्रन्थाः अङ्गीकृताः सन्ति। तेषामपिप्रश्नपत्राणिसंस्कृतभाषामाध्यमेननिर्मीयन्तेपाठ्यन्तेच। यद्यपिशिक्षाशास्त्रिपाठ्यकेसंस्कृतभिभानिप्रश्नपत्राणिसम्बद्धभाषामाध्यमेननिर्मीयन्तेपाठ्ययन्तेच। शिक्षाशास्त्रि-पाठ्यक्रमेसंस्कृतसम्बद्धोपाधिधरिणः छात्राप्रवेशमहर्न्ति।

शास्त्रिप्रथमवर्षे मुख्यविषयेषु (वेदज्योतिष-व्याकरणषुमृतिषु) त्रीणिप्रश्नपत्राणि संस्कृतमाध्येनपुमश्च द्वेपत्रे क्रमशः भाषा-दर्शनसाहित्यादिप्रभागेश्यसंस्कृतमाध्यमेनअध्याप्यन्ते। तयोः अध्ययनाध्यापनपरीक्षादिकं सर्वमपि मानकसरलसंस्कृतमाध्यमेन सम्पाद्यते।

अत्रसंस्कृतविश्वविद्यालयेशास्त्रसम्बद्धाः अनेके खलु कार्यक्रमाः क्रियन्ते। तेषां सर्वेषां कार्यक्रमाणां उपयोगित्वं शास्त्रपठनपाठने दरीदृश्यन्ते। यथा

(1) वाक्सभा (2) शास्त्रार्थसभा (3) वाग्वर्द्धिनीसभा

(4) एकल भाषणम्   (5) श्लोकान्त्याक्षरी   (6) सूत्रान्त्याक्षरी

(7) समस्यापूर्तिः

एते शैक्षणिकगतिविधयः संस्कृतभाषामाध्यमेनसम्पाद्यन्ते। शास्त्राधिगमाय संस्कृतभाषायां प्रवीणतायै संस्कृतविश्वविद्यालयस्य विभिन्नेषुविभागेषु संस्कृतभाषाप्रशिक्षणक्रमाः संस्कृतभाषामाध्यमेन संचाल्यन्ते। संस्कृतपाठ्यक्रमाणां सर्वतोभवेन अवगमनाय पाठ्यक्रमे उपनिबद्धानां सूक्तानां सूक्तीनाञ्च परिसरे प्रकाशनं ध्वनिमाध्यमेन छात्राणां कृते श्रवणमननव्यवस्था च कृताविद्यते।

विश्वविद्यालयस्य सर्वेषुविभागेषु विद्यावारिधि (PHD) कार्यक्रमान्तर्गते आधुनिकं विषयंसंकलय्य शास्त्रेषु अनुसंधानकार्यं विश्वविद्यालयेनसम्पाद्यते। आधुनिकविषयमतिरिच्यविद्यावारिधेः शोधप्रबन्धः संस्कृतभाषामाध्यमेन प्रस्तूयन्ते। शिक्षाशास्त्रिविभागेऽपिछात्राः स्वेछयासंस्कृतभाषामाध्यमेन शोधप्रबधं प्रस्तौति ।

शोधपाठ्यक्रमे शोधषाण्मासिकप्रशिक्षणपाठ्यक्रमे मुख्यत्वेनप्रशिक्षकाः संस्कृतमाध्यमेनशोधछात्रान्प्रशिक्षयन्ति। तथाच तेषांपरीक्षायाः प्रश्नपत्राण्यपिसंस्कृतभाषायाभवन्ति। शोधप्रवेशपरीक्षायाः प्रश्नपत्राण्यपिसंस्कृतभाषायांभवन्ति।

कमेऽस्मिरशास्त्रि-आचार्यशोधपाठ्यक्रमेषुमौखिकीपरीक्षापिसंस्कृत भाषायामेवभवति। विद्यावरिधेः छात्राणां कृतकार्यस्य प्रगतिविवरणम् गृहीतशोधविषयानुगुणं संस्कृतमाध्यमेण चोपस्थाप्यते। शोधपाठ्यक्रमेच त्रैमासिकं यद्प्रगतिविवरणं समर्प्यते तदपि संस्कृतभाषायामेव विधीयते। पाठ्यक्रमविषयाणां सहजतया सरलतयाावबोधनाय च अन्तर्जाल-माध्यमेन संस्कृतमाषायां विविधाः प्रकल्पाः शास्त्रप्रौढि ज्ञानचर्चा- ज्ञानवैभवसमुल्लासप्रभृतयः संस्कृतभाषामाध्यमेन समायोजिताः वर्तन्ते। पाठ्यक्रमाणांप्रकाशनंमुद्रणंचविश्वविद्यालयतः यथावसंरक्रियते। इदानीन्तनेसमयेसंशोधितसंस्करणंप्रकाशनविभागतः प्रकाशितं

भवति।प्रकाशितानि संस्करणानि स्पष्टतयापाठ्यक्रमं विषयानुगुणं द्योतयन्ति। तत्र पाठ्यक्रमः द्विधाविभक्तः

**( 1 ) निदर्शिका- भागः-4 खण्डः**

आचार्य- विद्यावारिधिवाचस्पति-परीक्षाणाम्कुल पृ.सं. 102

आचार्यप्रथमखण्डः-1-37

आर्चार्यद्वितीयखण्डः- 38-102

**( 2 ) निदर्शिका-भागः-4 खण्डः-3**

शास्त्रिपरीक्षायाः पाठ्यक्रमः पृ.सं. 174

शास्त्रीप्रथमखण्डः - पृ.सं. 01-56

शास्त्रीद्वितीयखण्डः - पृ.सं. 57-111

शास्त्रीय तृतीयखण्डः - पृ.सं. 112-174

उत्तरमध्यमापरीक्षायां गृहीतः कवर्गीयो विषयः शास्त्रिपरीक्षायां कवर्गीयो विषयो भविष्यति, किन्तु (अ) कमपि कवर्गीयं विषयं गृहीत्वोत्तीर्णोत्तरमध्यमापरीक्षः संस्कृतेन सहइण्टरमीडिएटपरीक्षां तत्समकक्षपरीक्षां वोत्तीर्णः वेद-नव्यव्याकरणनव्यन्याय-ज्योतिषातिरिक्तं कमपि कवर्गीयं विषयं गृहीत्वाशास्त्रिपरीक्षायां प्रवेशमर्हति।

(ख) उत्तरमध्यमायां गृहीतः खवर्गीयः विषयः शास्त्रिपरीक्षायांपरिवर्तितो भवितुमर्हति, किन्तु कस्यामपि परीक्षायां प्रथमखण्डेगृहीतः कोऽपि विषयः द्वितीयखण्डे परिवर्तितो भवितुं नार्हति।

(ग) ये छात्राः उत्तरमध्यमापरीक्षायां तत्समकक्षपरीक्षायां वाविज्ञानविषयं न गृहीतवन्तः स्युः, ते शास्त्रिपरीक्षायां

विज्ञानविषयं गृहीत्वा प्रवेशं नार्हन्ति।

(घ) खवर्गे गणितं गृहीत्वोत्तीर्णोत्तरमध्यमापरीक्षाः उत्तीर्णतत्समकक्षपरीक्षाः वा छात्रा कवर्गे गणितं गृहीत्वा शास्त्रिपरीक्षायांप्रवेशमर्हन्ति।

(च) क-वर्गीयं प्राचीनराजशास्त्रार्थशास्त्रविषयं गृहीत्वा शास्त्रिपरीक्षायामन्वेतुकामश्छात्रः 'ख'-वर्गीयेष्वधोलिखितेष्वेव विषयेषुकमप्येकं ग्रहीतुं शक्नोति।

१. राजशास्त्रम्, २. अर्थशास्त्रम्, ३. इतिहासः, ४. प्राचीन-भारतीयेतिहासः संस्कृतिश्च, ५. राजशास्त्रदर्शनम्

**निम्नलिखितेषु कवर्गान्तर्गतैकस्य विषयस्य ग्रहणमनिवार्यम्।**

१. ऋग्वेदः, २. शुक्लयजुर्वेदः (माध्यन्दिनशाखीयः),

३. कृष्ण-यजुर्वेदः (तैत्तिरीयशाखीयः), ४. सामवेदः, ५. अथर्ववेदः

(शौनकशाखीयः), ६. वेदनैरुक्तप्रक्रिया, ७. प्राचीनव्याकरणम्,

८. नव्यव्याकरणम्, ९. साहित्यम्, १०. प्राचीनन्यायवैशेषिकम्,

११. नव्यन्यायः, १२. सांख्ययोगम्, १३. पूर्वमीमांसा,

१४. वेदान्तः, १५. दर्शनम्, १६. जैनदर्शनम्, १७. बौद्धदर्शनम्,

१८. तुलनात्मकदर्शनम्, १९. थेरवादः (स्थविरवादः), २०. आगमः,

२१. योगतन्त्रम्, २२. धर्मशास्त्रम्, २३. पौरोहित्यम्,

**२४. पुराणेतिहासः, २५. गणितम्, २६. सिद्धान्तज्यौतिषम्,**

२७. फलितज्यौतिषम्, २८. प्राकृतम् एवं जैनागमः, २९. प्राचीनराजशास्त्रार्थशास्त्रम्, ३०. भारतीयविद्यासंस्कृतिः, ३१. शक्तिविशिष्टाद्वैतवेदान्तः, ३२. भाषाविज्ञानम्, ३३. तुलनात्मकधर्मः।

**(निम्नलिखितेषु खवर्गान्तर्गतैकस्य विषयस्य ग्रहणमनिवार्यम्)**

१. राजशास्त्रम्, २. अर्थशास्त्रम्, ३. इतिहासः, ४. प्राचीन-भारतीयेतिहासः संस्कृतिश्च, ५. भूगोलः,६. हिन्दीभाषा,७. नेपालीभाषा, ८. पालिः, ९. प्राकृतम्, १०. प्राचीनभारतीयराजनीतिः,

११. विज्ञानम्, (रसायनविज्ञानम्, जीवविज्ञानम्,भौतिकविज्ञानम्,) १२. तुलनात्मकदर्शनम्,

१३. समाजशास्त्रम्,१४. भाषाविज्ञानम्, १५. गृहविज्ञानम्, (केवलं बालिकानां कृते)

१६. इतिहासपुराणम्, १७. कन्नड़भाषा।अंग्रेजी, जर्मन, रूसी, फ्रेञ्च, चीनी, तिब्बती-भाषायां च

प्रतिखण्डमेकं प्रश्नपत्रं भविष्यति यद् उत्तरमध्यमायांतत्समकक्षपरीक्षायां वा अंग्रेजीविषयं गृहीत्वा उत्तीर्णाः परिक्षार्थिनःस्वेच्छया ग्रहीतुं प्रभवन्ति। उत्तीर्णतायां प्रमाणपत्रे तदुल्लेखोभविष्यति। अतिरिक्तविषये प्रथम-खण्डम् अंग्रेजीविषये उत्तीर्ण एवद्वितीयखण्डे अंग्रेजीविषये अन्वेतुमर्हति।

इत्थंसमग्रसंस्कृतसम्बद्धशास्त्राणिसंस्कृतभाषायांपाठ्यक्रमेनिबद्धानिसन्ति।

विश्वविद्यालयचपाठ्यक्रमसंरचनायांशास्त्राध्यापने अनुसन्धानेसर्वत्र संस्कृतमयंवातावरणं विद्यते।